**Series : WXYZ/S**

**SET ~ 4**

प्रश्न-पत्र कोड
Q.P. Code **22/S**

रोल नं.
Roll No.

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।
Candidates must write the Q.P. Code on the title page of the answer-book.

**नोट / NOTE :**

(I) कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **19** हैं।
Please check that this question paper contains **19** printed pages.

(II) प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.

(III) कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं।
Please check that this question paper contains **18** questions.

(IV) **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में यथा स्थान पर प्रश्न का क्रमांक अवश्य लिखें।**
**Please write down the Serial Number of the question in the answer-book at the given place before attempting it.**

(V) इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। 10.15 बजे से 10.30 बजे तक परीक्षार्थी केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।
15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the candidates will read the question paper only and will not write any answer on the answer-book during this period.

#

# संस्कृतम् (केन्द्रिकम्)
# SANSKRIT (Core)

*समयोः : होरात्रयम्* | *पूर्णाङ्काः : **80***
*निर्धारित समय : **3** घण्टे* | *अधिकतम अंक : **80***
*Time allowed : **3** hours* | *Maximum Marks : **80***

www.prepp.in

## *General Instructions :*

*Question paper is divided into **4** sections.*

*It has total **18** questions.*

- ***Section A** – 1 Question no. 1*
- ***Section B** – 3 Questions no. 2 to 4*
- ***Section C** – 4 Questions no. 5 to 8*
- ***Section D** – 10 Questions no. 9 to 18*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

## *सामान्य निर्देशा:*

*अस्मिन् प्रश्नपत्रे **चत्वार:** खण्डा: सन्ति ।*

*अस्मिन् प्रश्नपत्रे अष्टादश **(18)** प्रश्ना: सन्ति ।*

- ***खण्ड: 'क'** – 1 – प्रश्नसंख्या 1*
- ***खण्ड: 'ख'** – 3 – प्रश्नसंख्या 2 – 4*
- ***खण्ड: 'ग'** – 4 – प्रश्नसंख्या 5 – 8*
- ***खण्ड: 'घ'** – 10 – प्रश्नसंख्या 9 – 18*

*विशिष्ट–निर्देशानुसारं प्रश्ना: समाधेया: ।*

*उत्तरपुस्तिकायां लेखनात् पूर्वं सर्वप्रथमं प्रश्नसंख्या लेखनीया ।*

Prepp
Your Personal Exams Guide

## खण्ड: 'क'

## अपठितांश-अवबोधनम्

## अपठितांश अवबोधन

## Unseen Reading Comprehension

*10 अङ्का:*

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।
निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।
Read the following passage and answer the given questions in Sanskrit.

एकत्वभावनया यत् कार्यं क्रियते तद् 'एकता' इति कथ्यते। एकतया मानव: बलवान् भवति। एकतया समाज:, राष्ट्रं, जगत् च उन्नतिपथम् अधिरोहति। अद्यत्वे तु राष्ट्रे एकताया: अतीवावश्यकता अस्ति। यस्मिन् देशे एकताया अभावो विद्यते, स: देश: स्वकीयां स्वतन्त्रतां रक्षितुं नैव शक्नोति। अस्माकम् अपि देश: एकताया: अभावात् चिरं परतन्त्र: आसीत् परं यदा भारते एकत्वभावना समुत्पन्ना तदा भारतं स्वातन्त्र्यम् अलभत। एकताया: प्रभाव: जडवस्तुषु अपि दृश्यते। जलबिन्दव: सम्मिल्य नदीरूपं धारयन्ति। क्षुद्रतन्तव: अपि सम्मिल्य यदा रज्जुरूपं धारयन्ति, तदा ते बलशालिनं गजम् अपि नियन्त्रयितुं समर्था: भवन्ति। यदा अस्माकं विचारा:, व्यवहारा:, चिन्तनं, भाषणं सङ्कल्पश्च एकत्वभावनया परिपूर्णा: भवन्ति, तदा न किमपि असाध्यं भवति। संसारस्य प्राचीनतमे ग्रन्थे ऋग्वेदे अयमेव सन्देश: – "संगच्छध्वं संवदध्वम् सं वो मनांसि जानताम्" इति मन्त्रेण मानवकल्याणाय प्रदत्त:।

**प्रश्ना:**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in one word : (Only two questions) *2×1=2*

(i) मानव: कया बलवान् भवति ?

(ii) क्षुद्रतन्तव: सम्मिल्य किं रूपं धारयन्ति ?

(iii) अद्यत्वे राष्ट्रे कस्या: अतीवावश्यकता अस्ति ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in a complete sentence : (Only two questions) *2×2=4*

(i) एकतया किं किम् उन्नतिपथम् अधिरोहति ?

(ii) यस्मिन् देशे एकताया अभावो विद्यते तत्र किं भवति ?

(iii) कदा किमपि असाध्यं न भवति ?

www.prepp.in

Prepp
Your Personal Exams Guide

(इ) अस्य अनुच्छेदस्य द्वित्रिशब्दात्मकं समुचितं शीर्षकं लिखत।
इस अनुच्छेद का दो या तीन शब्दों में उचित शीर्षक लिखिए।
Write a suitable title for this passage in two or three words. *1×1=1*

(ई) यथानिर्देशम् उत्तरत : (केवलं प्रश्नत्रयम्)
निर्देशानुसार उत्तर दीजिए : (केवल तीन प्रश्न)
Answer as directed : (Only three questions) *3×1=3*

(i) "तदा ते बलशालिनं गजमपि नियन्त्रयितुं समर्था: भवन्ति"
इति वाक्ये 'ते' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(A) बलशालिने (B) गजाय
(C) क्षुद्रतन्तुभ्य: (D) रज्जुरूपाय

(ii) 'जलबिन्दव:' इति कर्तृपदस्य क्रियापदं किम् ?

(A) कथ्यते
(B) धारयन्ति
(C) शक्नोति
(D) भवन्ति

(iii) 'स्वतंत्र:' इति पदस्य विलोमपदमत्र किं प्रयुक्तम् ?

(A) अद्यत्वे
(B) मानव:
(C) परतन्त्र:
(D) जन्तव:

(iv) 'गजम्' इति पदस्य विशेषणपदं किम् ?

(A) असाध्यम्
(B) बलशालिनम्
(C) चिरम्
(D) स्वातन्त्र्यम्

www.prepp.in

Prepp
Your Personal Exams Guide

## खण्डः 'ख'

## रचनात्मकं-कार्यम् — 15 अङ्काः

## रचनात्मक कार्य

## Writing Skills

**2.** भवान् आलोकः दिल्ली-छात्रावासे वसति। स्वविद्यालयस्य वार्षिकोत्सवस्य वर्णनं कुर्वता मित्रं सौरभं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषा-प्रदत्तशब्दानां सहायतया पूरयित्वा पत्रं पुनः लिखत।

आप आलोक दिल्ली छात्रावास में रहते हैं। अपने विद्यालय के वार्षिकोत्सव का वर्णन करते हुए मित्र सौरभ को लिखे पत्र में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थान भरकर पत्र को पुनः लिखिए।

You are Aalok, you live in Delhi Hostel. Describing annual day of your school, write a letter to your friend Saurabh and rewrite it with the help of the words given in the box. $10\times\frac{1}{2}=5$

### पत्रम्

दिल्ली छात्रावासतः

दिनाङ्कः ________

प्रियमित्र (i) ________ !

सादरं (ii) ________ ।

ह्यः तव पत्रम् अधिगतम्। अत्र विशिष्टः समाचारः अयमेव अस्ति यत् गतसप्ताहे (iii) ________ विद्यालयस्य (iv) ________ सम्पन्नः जातः। वयं छात्राः सर्वे अध्यापकाः च अस्मिन् कार्यक्रमे (v) ________ आसन्। कार्यक्रमस्य मुख्यातिथिः (vi) ________ आसीत्। सः अस्माकं सांस्कृतिक-कार्यक्रमस्य (vii) ________ अकरोत्। सः (viii) ________ छात्रेभ्यः पुरस्कारान् अपि अयच्छत्। अहमपि पुरस्कारम् लब्धवान्। पितृभ्यां सादरं (ix) ________ ।

भवतः अभिन्नमित्रम्

(x) ________ ।

### मञ्जूषा

| |
|---|
| अस्माकम्, नमस्ते, आलोकः, योग्येभ्यः, शिक्षानिदेशकः, प्रणामाः, व्यस्ताः, वार्षिकोत्सवः, सौरभ !, प्रशंसाम्। |

www.prepp.in

Prepp
Your Personal Exams Guide

3. (क) मञ्जूषायां प्रदत्तशब्दानां सहायतया अधोलिखित-लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुन: लिखत।

मञ्जूषा में दिए गए शब्दों की सहायता से नीचे लिखी लघुकथा में रिक्त स्थान भरकर कथा को पुन: लिखिए।

Complete the blanks of the following short story, with the help of the words given in the box below and rewrite the same. $10\times\frac{1}{2}=5$

एकदा पाटलिपुत्रे (i) ____________ कुर्वत: भगवतो (ii) ____________ पार्श्वे एका वृद्धा (iii) ____________ समागता । (iv) ____________ पुत्र: सर्पदंशकारणात् (v) ____________ आसीत् । सा स्वपुत्रं पुन: (vi) ____________ भगवन्तं बुद्धं प्रार्थितवती। बुद्ध: तस्यै शाश्वतं (vii) ____________ उपदिशन् अकथयत् – यत् प्रत्येकं (viii) ____________ इह मृत्यु: (ix) ____________ एव भवति। अत एव अयं लोक: (x) ____________ कथ्यते।

**मञ्जूषा**

| |
|---|
| बुद्धस्य, महिला, धर्म-प्रचारम्, मृत:, तस्या:, उज्जीवयितुं, सत्यम्, मृत्युलोक:, जातस्य, निश्चित:। |

**अथवा (OR)**

(ख) अधोलिखित-संवादे रिक्तस्थानानि मञ्जूषाप्रदत्त-वाक्यै: पूरयत :

निम्नलिखित संवाद में रिक्त स्थान मञ्जूषा में दिए गए वाक्यों से भरिए :

Fill in the blanks in the following conversation with the help of given sentences in box : $5\times1=5$

*आचार्या* — भो उमे ! जानासि किं यद् अस्माकं देशस्य पूर्वं नाम किम् आसीत् ?

*उमा* — महोदय ! (i) ____________________ ।

*आचार्या* — शोभनम् । आर्यावर्तस्य अर्थोऽस्ति-आर्याणां स्थानम् । अत्र आर्यशब्दस्य कोऽर्थ: ?

*उमा* — महोदय ! (ii) ____________________ ।

*आचार्या* — शोभनम्, उमे ! अत्र सर्वे एव जना: श्रेष्ठा: आसन्। वद, 'भारतम्' नाम कस्य नाम्ना जातम् ?

*उमा* — महोदय ! (iii) ____________________ ।

*आचार्या* — शोभनम्। ऋषभदेवस्य पुत्र: चक्रवर्ती राजा भरत: आसीत्। तस्य नाम्ना एव भारतम् इति जातम्। एकोऽ पर: भरत: कस्य पुत्र: आसीत् ?

*उमा* — महोदय ! (iv) ____________________ ।

www.prepp.in

Prepp
Your Personal Exams Guide

| | | |
|---|---|---|
| *आचार्या* | — | शोभनम्, राज्ञः दशरथस्य चत्वारः पुत्राः आसन् – रामः, लक्ष्मणः, भरतः शत्रुघ्नश्च। रामेण सह वनं का गतवती ? |
| *उमा* | — | महोदय ! (v) ____________________ । |
| *आचार्या* | — | शोभनम्, सीता तु रामस्य पत्नी आसीत् । लक्ष्मणोऽपि रामेण सह वनं गतवान्। |

**मञ्जूषा**

| |
|---|
| भरतस्य नाम्ना 'भारतम्' इति जातम्। |
| रामेण सह सीता वनं गतवती। |
| आर्यशब्दस्य अर्थः 'श्रेष्ठ' इति भवति। |
| अस्माकं देशस्य पूर्वं नाम आर्यावर्तः आसीत्। |
| अपरः भरतः राज्ञः दशरथस्य पुत्रः आसीत्। |

**4.** अधोलिखित-वाक्येषु केषाञ्चन **पञ्च**वाक्यानां संस्कृतेन अनुवादं कुरुत।
निम्नलिखित वाक्यों में से किन्हीं **पाँच** वाक्यों का संस्कृत में अनुवाद कीजिए।
Translate any **five** sentences in Sanskrit from the following sentences. *5×1=5*

(i) मैं पिता के साथ गाँव जाता हूँ।
I go to the village with father.

(ii) मैं अयोध्या जाऊँगी।
I will go to Ayodhya.

(iii) शिष्य गुरु को प्रणाम करता है।
The student salutes the teacher.

(iv) लोग गंगा में स्नान करते हैं।
The people take bath in Ganga.

(v) सभी लोग नारी का सम्मान करते हैं।
All the people respect women.

(vi) नदी के दोनों ओर पेड़ हैं।
There are trees on both sides of the river.

(vii) शिक्षक छात्रों को पढ़ाता है।
The teacher teaches students.



Prepp Your Personal Exam Guide

www.prepp.in

Prepp
Your Personal Exams Guide

**खण्डः 'ग'**

**अनुप्रयुक्त-व्याकरणम्** *20 अङ्काः*

**अनुप्रयुक्त-व्याकरण**

**Applied Grammar**

**5.** अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (प्रश्नषट्कम् केवलम्)

निम्नलिखित वाक्यों में रेखांकित पदों का सन्धि अथवा सन्धि-विच्छेद करके लिखिए। (केवल छह प्रश्न)

Disjoin or join sandhis in the underlined words of the following sentences. (Only six questions) *6×1=6*

(i) आर्य ! गुणाः खलु + अत्र।

(ii) कुत्र उत्पन्नोऽयं दोषः।

(iii) भवान् पक्षपातात् + एव नार्थम् अवेक्षते ।

(iv) आर्तस्य यथा + ओषधम्।

(v) दौवारिकस्तु तमाकृष्य नयन्नेव प्रचलितः।

(vi) तदा + अहं तु जीवन्नपि मृतः भविष्यामि।

(vii) तनुवाक् + विभवः अपि सन्।

(viii) स्वाध्यायान्मा प्रमदः।

Prepp
Your Personal Exams Guide

**6.** अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत। (केवलं प्रश्नपञ्चकम्)

निम्नलिखित वाक्यों में रेखांकित पदों का उचित समस्तपद या उचित विग्रह को प्रदत्त विकल्पों से चुनकर लिखिए। (केवल पाँच प्रश्न)

Select the appropriate expound from the given choices for the underlined words 'समस्तपद' or 'विग्रह' of the following sentences.

(Only five questions) *5×1=5*

(i) एषा <u>वेदोपनिषत्</u>।

(A) वेदानाम् उपनिषत्

(B) वेदेषु उपनिषत्

(C) वेदाय उपनिषत्

(D) वेदम् उपनिषत्

(ii) लक्ष्मण: <u>यथाशक्ति</u> प्रतिरोधं करोति।

(A) शक्तिं यथा

(B) शक्तिम् अनतिक्रम्य

(C) शक्तिम् अतिक्रम्य

(D) शक्तिं क्रम्य

(iii) कथं संन्यासिनोऽपि <u>कठोरभाषणै:</u> तिरस्करोषि ?

(A) कठोराणां भाषणै:

(B) कठोरे भाषणै:

(C) कठोरै: भाषणै:

(D) भाषणानां कठोर:

www.prepp.in

Prepp
Your Personal Exams Guide

(iv) आत्मन: <u>वधस्य योजनां</u> ज्ञात्वा भोज: कथितवान्।

(A) वधात्योजनाम्

(B) वधस्ययोजनाम्

(C) योजनानाम्वध:

(D) वधयोजनाम्

(v) परस्परमनुव्रतौ <u>पतिपत्न्यौ</u> त्रिवर्गं साधयत:।

(A) पति: च पत्नी च

(B) पती च पत्नी च

(C) पति: पत्न्यौ च

(D) पतिपत्नी च

(vi) मुञ्ज: भविष्यवाणीं श्रुत्वा <u>विच्छायवदनो</u> जात:।

(A) विच्छायम् वदनम्

(B) विच्छायाया: वदनम्

(C) विच्छायं वदनं यस्य स:

(D) विच्छाय: इव वदन: यस्य

(vii) परमात्मा <u>अनश्नन्</u> एव अभिचाकशीति।

(A) न अश्नन्

(B) अनश् नन्

(C) अन् अश्नन्

(D) न अनश्नन्

www.prepp.in

Prepp
Your Personal Exams Guide

**7.** अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्य: चिनुत। (केवलं प्रश्नषट्कम्)

निम्नलिखित वाक्यों में रेखांकित पदों के उपयुक्त संयुक्त अथवा विभक्त प्रकृति-प्रत्यय योग को दिए गए विकल्पों में से चुनिए। (केवल छह प्रश्न)

From the given choices, choose the correct combination of joint or disjoint set of suffix for the underlined words in the following sentences.

(Only six questions) *6×1=6*

(i) दैवी संपद् विमोक्षाय भवति।

(A) देव + ङीप्   (B) दैव + इन्
(C) दैव + ङीप्   (D) देव + ई

(ii) श्लाघनीये काले अत्रभवतीं वारयितुं नोत्सहे।

(A) श्लाघ + ल्यप्   (B) श्लाघ् + अनीयर्
(C) श्लाघ् + तुमुन्   (D) श्लाघ् + तव्यत्

(iii) शुद्धि + मतुप् तदन्वये दिलीप: प्रसूत:।

(A) शुद्धिमत्   (B) शुद्धिमति:
(C) शुद्धिवत्   (D) शुद्धिमति

(iv) ततो यान्ति अधमां गतिम्।

(A) गम् + तव्यत्   (B) गम् + त्व
(C) गम् + क्तिन्   (D) गत् + त्वम्

(v) कुपात्रेषु दीयमानं धनं क्षयमेति।

(A) दा + शानच्   (B) दी + शानच्
(C) दा + शतृ   (D) दा + मतुप्

(vi) भोजराजो मया रक्ष् + क्त एव अस्ति।

(A) रक्षक्त:   (B) रक्षिक्त:
(C) रक्षित:   (D) रक्षितवान्

www.prepp.in

Prepp
Your Personal Exams Guide

(vii) बली बलं वेत्ति न वेत्ति निर्बल: ।

(A) बल + इन्

(B) बलि + इन्

(C) बल + ङीप्

(D) बल + क्तिन्

**8.** समुचितम् उपपद-विभक्तिरूपं चिनुत। (केवलं प्रश्नत्रयम्)
उपयुक्त उपपद विभक्ति रूप को चुनिए। (केवल तीन प्रश्न)
Choose the appropriate subordinate clause form. (Only three questions) *3×1=3*

(i) ________ न प्रमदितव्यम् ।

(A) धर्मात् (B) धर्मम्

(C) धर्मेण (D) धर्मे

(ii) ________ सह सीता वनं गन्तुम् इच्छति ।

(A) रामाय

(B) रामात्

(C) रामम्

(D) रामेण

(iii) राजा कथं ________ उपगत: ?

(A) मोह:

(B) मोहम्

(C) मोहेन

(D) मोहाय

(iv) अहम् ________ प्रशिक्षणं प्रदास्यामि ।

(A) शिशून्

(B) शिशो:

(C) शिशुभ्य:

(D) शिशौ

www.prepp.in
Prepp
Your Personal Exams Guide

## खण्ड: 'घ'

### (i) पठितांशावबोधनम् — *25 अङ्का:*

### पठितांश अवबोधन
### Reading Comprehension

**9.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।
निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।
Read the following prose passage and answer the questions based on them in Sanskrit. *5*

शोकसन्तप्तो मुञ्ज: प्रायश्चित्तं कर्तुम् आत्मनो वह्नौ प्रवेशनं निश्चितवान्। राज्ञ: वह्निप्रवेश-कार्यक्रमं श्रुत्वा वत्सराज: बुद्धिसागरं नत्वा शनै: शनै: प्राह-तात ! मया भोजराजो रक्षित एवास्ति। पुन: बुद्धिसागरेण तस्य कर्णे किमपि कथितम्, यन्निशम्य वत्सराज: ततो निष्क्रान्त:। पुन: राज्ञो वह्निप्रवेशकाले कश्चन कापालिक: सभां समागत:। सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्ज: प्रावोचत् – हे योगीन्द्र ! महापापिना मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति। अत: कापालिक: तं प्रावोचत् – राजन् ! मा भैषी:। शिवप्रसादेन स: जीवितो भविष्यति। तदा श्मशान-भूमौ कापालिकस्य योजनानुसारं भोज: तत्र समानीत: 'योगिना भोजो जीवित:' इति कथा लोकेषु प्रसृता। पुन: गजेन्द्रारूढो भोजो राजभवनम् अगात्। सन्तुष्टो राजा मुञ्ज: भोजं निजसिंहासने निवेश्य निजपट्टराज्ञीभिश्च सह तपोवनभूमिं गत्वा परं तपस्तेपे। भोजश्चापि चिरं प्रजा: पालितवान्।

**प्रश्ना:**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) वत्सराज: कं नत्वा शनै: शनै: प्राह ?
(ii) कश्चन कापालिक: कुत्र समागत: ?
(iii) गजेन्द्रारूढ: क: राजभवनम् अगात् ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) मुञ्ज: किं कर्तुं वह्नौ प्रवेशनं निश्चितवान् ?
(ii) कदा कश्चन कापालिक: सभां समागत: ?
(iii) लोकेषु का कथा प्रसृता ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)
Answer as directed : (Only two questions) $2\times1=2$

(i) 'शोकसन्तप्तो मुञ्ज:' अनयो: पदयो विशेषणपदं किम् अस्ति ?
(ii) 'अगात्' अस्य क्रियापदस्य कर्तृपदं किम् ?
(iii) 'अग्नौ' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

www.prepp.in

Prepp
Your Personal Exams Guide

**10.** अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following poetry and answer the questions based on them in Sanskrit. *5*

दीर्घप्रयासेन कृतं हि वस्तु,
निमेषमात्रेण भजेद् विनाशम्।
कर्तुं कुलालस्य तु वर्षमेकं,
भेत्तुं हि दण्डस्य मुहूर्तमात्रम्॥

**प्रश्नाः**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) वस्तु केन कृतं भवति ?

(ii) निमेषमात्रेण किं विनाशं भजेत् ?

(iii) कस्य कर्तुं वर्षमेकं भवति ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) दीर्घप्रयासेन कृतं वस्तु कियत्कालेन विनाशं भजेत् ?

(ii) कुलालस्य वस्तु कर्तुं कियत्कालं भवेत् ?

(iii) दण्डस्य कियत्कालं भेत्तुम् अलम् ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)
Answer as directed : (Only two questions) $2\times1=2$

(i) 'वर्षम्' इत्यस्य विशेषणपदं किं प्रयुक्तम् ?

(ii) 'कुम्भकारस्य' पर्यायपदं किम् ?

(iii) 'वस्तु' इति कर्तृपदस्य क्रियापदं किम् ?

www.prepp.in

Prepp
Your Personal Exams Guide

**11.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following part of a drama and answer the questions based on them in Sanskrit. *5*

*ऋतध्वजः* — अहो शोभनं गन्धर्वराजविश्वावसोः राजोद्यानम्। आम्रमञ्जरीणां परां शोभां दृष्ट्वा कोकिलानां च मधुरवचांसि श्रुत्वा कस्य यूनो हृदयं सहसा उत्कण्ठितं न भविष्यति ? वामपार्श्वे रमणीनाम् आलाप-इव श्रूयते। अत्रैव स्थित्वा श्रोष्यामि।

*कुण्डला* — सखि ! मदालसे ! त्वं तु केवलं विद्याध्ययने एव रता कियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि ?

*मदालसा* — ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि।

*कुण्डला* — विनयशीले ! विद्या ददाति विनयम् अत एव एवं भणसि। कुलगुरु-तुम्बुरुमहाभागैस्तु गन्धर्वराजाय अन्यदेव सूचितम्।

*मदालसा* — किं श्रुतं त्वया यद् गुरुवर्यैः माम् अधिकृत्य पित्रे कथितम् ?

*कुण्डला* — अथ किम्। राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता परं तया स्वयं वरः न प्राप्तः। अतः तस्यै योग्यवरस्य अन्वेषणं कार्यम् इत्यासीद् गुरुपादानां मतम्।

**प्रश्नाः**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) गन्धर्वराजविश्वावसोः राजोद्यानं कीदृशम् ?

(ii) वामपार्श्वे कासाम् आलापः इव श्रूयते ?

(iii) विद्या किं ददाति ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) किं श्रुत्वा कस्य यूनो हृदयं उत्कण्ठितं न भविष्यति ?

(ii) ज्ञानोदधिः कीदृशः ?

(iii) सम्प्रति राजकुमारी मदालसा कीदृशी जाता ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)

निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)

Answer as directed : (Only two questions) $2\times1=2$

(i) 'पिकानाम्' इति पदस्य कृते पर्यायपदं किं प्रयुक्तम् ?

(ii) 'ज्ञानोदधिः अनन्तपारः' इति पदयोः विशेष्यपदं किम् ?

(iii) 'ददाति' इति क्रियापदस्य कर्तृपदं किम् ?

www.prepp.in

Prepp
Your Personal Exams Guide

**12.** (क) अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तशब्दैः पूरयित्वा पुनः लिखत।
निम्नलिखित पद्य का भावार्थ मञ्जूषा में दिए गए शब्दों से भरकर पुनः लिखिए।
Rewrite the gist of the following verse by filling it with the help of the words given in the box. *3×1=3*

त्रैलोक्यं दग्धुकामेव ललाटपुट-संस्थिता।
भृकुटिर्लक्ष्मणस्यैषा नियतीव व्यवस्थिता॥

**भावार्थः**

सौमित्रस्य (i) __________ स्थिता भृकुटिः लोकत्रयं दग्धुम् (ii) __________ नियतिः इव (iii) __________ अस्ति।

**मञ्जूषा**

| |
|---|
| इच्छन्ती, ललाटमध्ये, व्यवस्थिता |

**अथवा (OR)**

(ख) प्रदत्तभावत्रयात् शुद्धं भावार्थं चित्वा लिखत।
दिए गए तीन भावार्थों में से शुद्ध भावार्थ चुनकर लिखिए।
Write the correct essence from three essences of the following each part. *3×1=3*

(अ) "इदमस्तीदमपि मे भविष्यति पुनर्धनम्।"
- (i) मम पार्श्वे एतन्मात्रं धनमस्ति पुनः अत्यधिकमपि धनं प्राप्स्यामि।
- (ii) इदं वस्तु मम वर्तते अन्यमपि मे स्यात्।
- (iii) इदमस्ति इदं चिन्तयित्वा कोऽपि सन्तुष्टः न।

(आ) "युधिष्ठिरस्य एषा एव चिन्तनसरणिः।"
- (i) ज्येष्ठपाण्डुपुत्रस्य द्यूतविषये ईदृशी एव विचारधारा आसीत्।
- (ii) तस्य ईदृशी प्रवृत्तिः चिन्तनीया आसीत्।
- (iii) युधिष्ठिरस्य कुलपरम्परा ईदृशी एव।

(इ) "नैकेनापि समं गता वसुमति।"
- (i) सामान्यजनेन सार्धं वसुमती नैव गच्छति।
- (ii) एकेन सह वसुमती गता।
- (iii) मृत्योः अनन्तरं न केनापि सह इयं वसुमती गताऽस्ति।

**13.** अधोलिखित-श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानानि मञ्जूषाप्रदत्त-शब्दानां सहायतया पूरयत ।

निम्नलिखित श्लोक के दिए गए अन्वय में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए शब्दों की सहायता से कीजिए ।

The prose-order rendering of the following verse is given. Fill in the blanks with the help of words given in the box. *3×1=3*

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाऽऽचारो न सत्यं तेषु विद्यते ॥

**अन्वयः**

आसुराः जनाः (i) ____________ च निवृत्तिम् च न विदुः तेषु न (ii) ____________ न अपि च आचारः न (iii) ___________ विद्यते ।

**मञ्जूषा**

| |
|---|
| शौचम्, प्रवृत्तिम्, सत्यम् । |

**14.** 'क' स्तम्भस्य वाक्यानां 'ख' स्तम्भस्य उपयुक्तवाक्यैः सह मेलनं कुरुत ।

'क' स्तम्भ के वाक्यों का 'ख' स्तम्भ के उपयुक्त वाक्यों के साथ मिलान कीजिए ।

Match the sentences of column 'क' with suitable sentences of column 'ख'. $4\times\frac{1}{2}=2$

| | *'क' स्तम्भः* | | *'ख' स्तम्भः* |
|---|---|---|---|
| i. | भरतो वा भवेद् राजा | 1. | विभूषणं मौनमपण्डितानाम् । |
| ii. | शैशवेऽभ्यस्तविद्यानां | 2. | वयं वा ननु तत्समम् । |
| iii. | विशेषतः सर्वविदां समाजे | 3. | मिमं प्राप्स्ये मनोरथम् |
| iv. | इदमद्य मया लब्ध- | 4. | यौवने विषयैषिणाम् । |

Prepp
Your Personal Exams Guide

**15.** अधोलिखित-वाक्येषु रेखाङ्कित-पदानां प्रसङ्गानुसारं शुद्धम् अर्थं मञ्जूषात: चित्वा लिखत।
निम्नलिखित वाक्यों में रेखांकित पदों का प्रसंगानुसार शुद्ध अर्थ मञ्जूषा से चुनकर लिखिए।
Choose and write the appropriate meanings of the underlined words in the following sentences with the help of the words given in the box. $4\times\frac{1}{2}=2$

(i) प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।

(ii) आ: अपण्डित: खलु भवान्।

(iii) त्वादृशा एव वस्तुत: पुरस्कार-भाजनानि भवन्ति।

(iv) असौ मया हत: शत्रु:।

**मञ्जूषा**

| |
|---|
| मूर्ख:, कल्याणाय, मारित:, पात्राणि। |

**खण्ड: 'घ'**

**(ii) संस्कृतसाहित्यस्य सामान्यपरिचय:** *10 अङ्का:*

**संस्कृत साहित्य का सामान्य परिचय**

**General Introduction to Sanskrit Literature**

**16.** अधोलिखित-प्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)
निम्नलिखित प्रश्नों के उत्तर लिखिए। (केवल तीन प्रश्न)
Answer the following questions. (Only three questions) $3\times1=3$

(i) 'मातुराज्ञा गरीयसी' इति पाठस्य सन्दर्भग्रन्थ: क: ?

(ii) 'प्रजानुरञ्जको नृप:' इति पाठस्य लेखक: क: ?

(iii) 'दौवारिकस्य निष्ठा' अस्य पाठस्य सन्दर्भग्रन्थ: क: ?

(iv) 'मदालसा' इति नाटकस्य लेखिका का ?

www.prepp.in

Prepp
Your Personal Exams Guide

**17.** मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत। (केवलं प्रश्नत्रयम्)

मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति करके लिखिए। (केवल तीन प्रश्न)

Fill in the blanks with the help of the words given in the box.

(Only three questions) *3×1=3*

(i) गद्यकाव्ये 'हर्षचरितम्' __________ अस्ति।

(ii) __________ कवीनां निकषं वदन्ति।

(iii) सर्गबन्धो __________ कथ्यते।

(iv) गद्यपद्यमयं __________ कथ्यते।

**मञ्जूषा**

| |
|---|
| महाकाव्यम्, चम्पूकाव्यम्, गद्यम्, आख्यायिका। |

**18.** समुचितं मेलयत :

समुचित मिलान कीजिए :

Match properly : *4×1=4*

| *भाग: 'क'* | | *भाग: 'ख'* | |
|---|---|---|---|
| i. | नाटकस्य प्रारम्भे भवति | 1. | नाटकम् |
| ii. | स्वप्नवासवदत्तम् | 2. | भवभूते: कृति: |
| iii. | उत्तररामचरितम् | 3. | नान्दी |
| iv. | रूपकस्य भेद: | 4. | भास: |